# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – शुक्लयजुर्वेदमाध्यन्दिनसंहिता (२२-२४ अध्यायाः)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या।**

१ अग्नये स्वाहा सोमाय स्वाहापां मोदाय स्वा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥

२ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

३ कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।
किं स्विद्धिमस्य भेषजं किंवावपनं महत् ॥

४ सूर्य एकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत् ॥

**प्रश्नः २** माध्यन्दिनसंहितायाः द्वाविंशतितमाध्यायगतः अश्वमेधीय-अश्वसंस्कारः निरूप्यताम् ।

**प्रश्नः ३** माध्यन्दिनसंहितायाः द्वाविंशतितमाध्यायगतान् विषयान् निरूपयत ।

**प्रश्नः ४** माध्यन्दिनसंहितायाः त्रयोविंशतितमाध्यायमाश्रित्य हिरण्यगर्भस्वरूपमुपपादयत ।

**प्रश्नः ५** माध्यन्दिनसंहितायाः त्रयोविंशतितमाध्यायम् अश्वमेधीय-अश्वसम्बन्धे अधीतभाष्यालोके स्वविचारान् उपस्थापयत ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः मन्त्रयोः व्याख्या कार्या।**

१ एतो ऐन्द्राग्ना द्विरूपा अग्निषोमीया वामना अनड्वाह आग्नावैष्णवा वशा मैत्रावरुणयोऽन्यत एन्यो मैत्र्यः ॥

२ कृष्णग्रीवा आग्नेया बभ्रवः सौम्याः श्वेताः वायव्या अविज्ञाता अदित्यै सरूपा धात्रे

वत्सतर्यो देवानां पत्नीभ्यः ॥

३ उक्ताः संचरा एता ऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः ॥

४ उक्ताः संचरा एताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः ॥

**प्रश्नः ७** माध्यन्दिनसंहितायाः चतुर्विंशतितमाध्यायस्य सारांशं लिखत ।

**प्रश्नः ८** माध्यन्दिनसंहितायाः चतुर्विंशतितमाध्यायमाश्रित्य विशेषपशूनां विषये यथाज्ञानं लिखत ।

**प्रश्नः ९** वैदिकाध्ययनसन्दर्भे प्रकृति-विकृतिपाठयोः वैशिष्ट्यमुपपादयत ।

**प्रश्नः १०** घनपाठस्य सोदाहरणं स्वरूपं लिखत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ 'आयुष्पा' इत्यस्य कोऽर्थः ?

२ 'स्वगा' शब्दस्य कोऽर्थः ?

३ 'हिङ्काराय' इत्यत्र का विभक्तिः ?

४ 'धावते' इत्यत्र का विभक्तिः ?

५ 'हिङ्कृताय' इति कस्य विशेषणम् ?

६ 'ब्रध्नम्' इत्यस्य कोऽर्थः ?

७ 'नृवाहसा' इत्यस्य कोऽर्थः ?

८ 'दाधार' इत्यस्य कोऽर्थः ?

९ शुक्लयजुर्वेदस्य माध्यन्दिसंहितायां द्वाविंशाध्याये कियन्तो मन्त्राः सन्ति ?

१० 'शोणः' इत्यस्य कोऽर्थः ?

११ हिमस्य भेषजं किम् ?

१२ का पूर्वचित्तिः आसीत् ?

१३ अश्वः कुतः जातः ?

१४ माध्यन्दिनसंहितायां त्रयोविंशतितमाध्याये कियन्तो मन्त्राः ?

१५ अश्वस्तूपरः कः भवति ?

****